श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री उत्तमूर् वीरराघवाचार्य अनुगृहीता

# ॥ श्री लक्ष्मीहयवदन प्रपत्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीहयवदन प्रपत्तिः ॥

विशुद्धविज्ञानघनस्वरूपं
    विज्ञान विश्राणन बद्धदीक्षम्।
दयानिधिं देहभृतां शरण्यं
    देवं हयग्रीवमहं प्रपद्ये ॥ 1 ॥

ब्रह्माणमादौ व्यदधादमुष्मै
    वेदांश्च यः स्म प्रहिणोति नित्यान्।
स्वगोचरज्ञान विधायिनं तं
    देवं हयग्रीवमहं प्रपद्ये ॥ 2 ॥

उद्गीथतारस्वरपूर्वमन्तः
    प्रविश्य पातालतलादहार्षीत्।
आम्नायमाकण्ठहयो य एतं
    देवं हयग्रीवमहं प्रपद्ये ॥ 3 ॥

प्रदाय पुत्राय पुनः श्रुतीर्यो
    जघान दैत्यौ नियताब्धिवासम्।
हव्यैश्च कव्यैश्च तमर्च्यमानं
    देवं हयग्रीवमहं प्रपद्ये ॥ 4 ॥

यन्नाभिनालीकदलस्थनीर
    बिन्दूत्थितौ तौ मधुकैटभाख्यौ।
वेदापहाराय तमो रजस्तं
    देवं हयग्रीवमहं प्रपद्ये ॥ 5 ॥

काम्यार्च्यतां प्राप्य वरं सुरेषु
गतेषु यज्ञाग्रहरोऽर्थितो यः।
अदर्शयत् काय हयं वपुस्तं
देवं हयग्रीवमहं प्रपद्ये॥ **6**॥

यो जायमानं पुरुषं प्रपश्यन्
मोक्षार्थचिन्तापरमातनोति।
विद्याधिदेवं मधुसूदनं तं
देवं हयग्रीवमहं प्रपद्ये॥ **7**॥

आदित्यबिम्बेऽश्ववपुर्दधत् सन्
अयातयामान् निगमान् अदिक्षत्।
यो याज्ञवल्क्याय दयानिधिं तं
देवं हयग्रीवमहं प्रपद्ये॥ **8**॥

विज्ञानदानप्रथिता जगत्यां
व्यासादयो वागपि दक्षिणा सा।
यद्वीक्षणांशाऽऽहितवैभवास्तं
देवं हयग्रीवमहं प्रपद्ये॥ **9**॥

मत्स्यादिरूपाणि यथा तथैव
नानाविधाचार्यवपूंषि गृह्णन्।
वेदान्तविद्याः प्रचिनोति यस्तं
देवं हयग्रीवमहं प्रपद्ये॥ **10**॥

श्रेष्ठः कृतज्ञः सुलभोऽन्वितानां
शान्तः सुबुद्धिः प्रथितो हि वाजी।
तदाननाविष्कृतसद्गुणौघं
देवं हयग्रीवमहं प्रपद्ये॥ **11**॥

हस्तैर्दधानं दरचक्रकोश -
    व्याख्यानमुद्राः सितपद्मपीठम्।
विद्याख्यलक्ष्म्यञ्चितवामभागं
    देवं हयग्रीवमहं प्रपद्ये॥ **12** ॥

॥ इति श्री लक्ष्मीहयवदन प्रपत्तिः समाप्ता॥